शृङ्गेरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता-शासन-संमता विश्वप्रिया पाक्षिकी पत्रिका एक-

शारदा

संपादकः पं. वसन्त अ. गाडगीळ.

वार्षिकं मूल्यम् रू. २५ *** अस्य अङ्कस्य रू. १.२५

भारतीय सौर दिनाङ्क ११ पौष १९०६ वर्षम् २६ : अङ्कः १०
विक्रम-संवत् २०४१ मङ्गलवासरः दिनाङ्क १.१.१९८५
पुणे-डेरवण (चिपळूण) यज्ञ-महोत्सव-विशेषाङ्क-दैनिकम् ८



राजतिलक भूषितः भारत-भाग्य-विधाता।

नवदेहली : अष्टमे लोकसभा-निर्वाचन-संगरे ऐतिहासिकं सर्वोच्च-विजयं संपाद्य श्री. राजीव गान्धी नेतृत्वेन नूतनं चत्वारिंशत् (४०) सदस्य-मंत्रि-मण्डलं राष्ट्रपति-भवने गतदिने शपथ-विधिना सुप्रति तिष्ठम्। नूतन-वर्षारम्भे सहर्षं हार्दम् अभिनन्दनं भारत-भाग्य विधात्रे नूतनाय महामात्याय, मंत्रिमण्डल-सदस्येभ्यः च।

अहो तिथि-विशेष-महात्म्यम्

२८ डिसेम्बर १८८५ राष्ट्रसभा (कॉङ्ग्रेस) स्थापना
२८ डिसेम्बर १९८४ राजीव-गान्धी-विजयः।
३१ ऑक्टोबर १९८४ महामात्या-इन्दिरा-हत्या।
३१ डिसेम्बर १९८४ राजीव-गान्धी-महामात्याभिषेकः।

पुनरागमनाय च।

'यान्तु द्विजगणाः सर्वे सर्वां स्वीकृत्य सत्कृतिम्।
याग-कार्य-प्रसिद्ध्यर्थं पुनरागमनाय च।'

इति पू. दिगम्बरदास-महाराज-प्रार्थनां स्वीकृत्य राजसूय-विभवेन सुफलतां गतं 'यज्ञ-महोत्सवं संपन्नतां नीत्वा स्वं स्वं स्थलं प्रस्थिता द्विजानां साहस्त्री भारतस्य विविधेभ्यः दिग्विभागेभ्यः श्रीपरशुराम-क्षेत्रे-परिसरे 'दहर-वनं' (डेरवण) समागता।

आर्य-सनातन-वैदिक-धर्मस्य पुनुत्थानाय सर्वे सद्धर्मानुयायिनः सज्जाः सन्तु। अस्मिन् धर्म-ग्लानि-काले भगवान् परमेश्वरः 'तदात्मानं सृजाम्यहम्' इति तस्य वचनम् अनु नचिरम् एव अवतरिष्यति। तस्मै स्वागतं धर्मानुष्ठानेन एव समुचितम्। अतः 'सत्यं वद। धर्मं चर। स्वाध्यायान् मा प्रमदः।' इति धर्मोपदेशः शिरोधार्यः भवतु इति सर्वेषां प्रस्थान-मङ्गलक्षणे पू.दिगम्बरदासमहाराज-शुभ-संदेशः।

****

नूतनं केंद्रीयं मंत्रिमण्डलम्।

मंत्री	विभागः
राजीव गांधी	परराष्ट्र, सांस्कृतिक कार्य, युवक कल्याण विज्ञान अणु-उर्जा व वाटप न झालेली खाती
नरसिंहराव	संरक्षण, नियोजन
शंकरराव चव्हाण	गृह
व्ही. पी. सिंग	अर्थ
बुटासिंग	शेती व ग्रामविकास
एच. के. एल. भगत	संसदीय कामकाज
के. सी. पंत	शिक्षण
श्रीमती मोहसिना किडवाई	आरोग्य कुटुंब कल्याण
राव विरेंद्रसिंग	अन्न, नागरी पुरवठा
वसंतराव साठे	पोलाद, खाण व कोळसा
वीरेंद्र पाटील	रसायने व खते
अब्दुल गफूर	बांधकाम, गृहनिर्माण
अशोक सेन	कायदा
बी. शंकरानंद	पाटबंधारे व उर्जा
बन्सीलाल	रेलवे
राज्यमंत्री	
श्रीमती मार्गारथम चंद्रशेखर	महिला, समाजकल्याण
नवलकिशोर शर्मा	पेट्रोलियम
रामनिवास मिर्धा	दळणवळण
टी. अंजय्या	कामगार
विठ्ठलराव गाडगीळ	माहिती व प्रसारण
झेड. ए. अन्सारी	जहाज वाहतूक
मोहमद अश्रफ खान	उद्योग
अरुण नेहरू	उर्जा
अशोक गेलहोट	पर्यटन
वीरसेन	जंगल
चंदुलाल चंद्राकार	ग्रामीण विकास
गुलाम नबी आझाद	संसदीय कामकाज
एच. आर. भारद्वाज	कायदा व न्याय
जनार्दन पुजारी	अर्थ
खुर्शीद आलम खान	परराष्ट्र व्यवहार
के. पी. सिंगदेव	सामान्य प्रशासन व सांस्कृतिक कार्य
के. आर. नारायणन	नियोजन
माधवराव शिंदे	रेल्वे
मागरिट अलवा	संसदीय कामकाज
नटवर सिंग	पोलाद
पी. ए. संगमा	व्यापार व पुरवठा
जयचंद सिंग	युवक कल्याण व क्रीडा
रामदुलारी सिन्हा	गृह
शिवराज पाटील	विज्ञान व तंत्रज्ञान, अणु उर्जा
योगेंद्र मक्काना	आरोग्य

शृङ्गेरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता-शासन-संमता विश्वप्रिया पाक्षिकी पत्रिका

शारदा

संपादकः वसन्त अ. गाडगीळ

वर्षम् २६ अङ्कः १० सौर ११ पौष १९०६, १ जानेवारी १९८५

अमेरिका-देशे गणकयंत्रे ऋग्वेद-संहिता

अमेरिका-राष्ट्रे गणक-यंत्र-(कॉम्प्युटर) माध्यमेन रोमन-लिपि-विषयकं मुद्रणम् एतावत्-कालं सर्व ज्ञातम्। परम् अमेरिकीयैः विदेश-लिपि-मुद्रण-सौकर्यार्थम् आदौ आर्य-सनातन-वैदिक-धर्मस्य संस्कृत-भाषा-लिपिः देवनागरी तत्-समकालम् एव द्राविडानां तामिळ-लिपिः इति लिपि-द्वयं स्वीकृत्य प्रारब्धं तत्-तत्-लिपिम् आश्रित्य मुद्रणम् अपि इति फिलाडेल्फिया-नगरे षष्ठे विश्व-संस्कृत-सम्मेलने साक्षात्-कृतम् अस्माभिः।

देवानागरी-लिपि-शब्द-साधनार्थं मॅकिन्तोष कॉम्प्युटर-गणक यंत्रम्। इति शीर्षक-युतः शोध-प्रबन्धः 'ॲपल् कॉम्प्युटर' प्रतिनिध्येन श्री. मार्क कटरमहाभागेन पठितः १४ ऑक्टोबर १९८४ विश्व-सम्मेलन-प्रारम्भ-दिने।

गतेषु केषुचित् मासेषु कॅलिफोर्निया विश्वविद्यालयस्य (बर्कली) श्री. जॉर्ज हार्टमहाभागेन 'ॲपल कॉम्प्युटर'-संचालकेन श्री. मार्क कटरमहोदयेन च भृशं प्रयत्यते मॅकिन्तोष-'कॉम्प्युटर'-माध्यमेन दक्षिण आशिया-खण्डस्य विविध-लिपीनां कृते मुद्रण-सौकर्यं साधयितुम्।

आयबीएम्-------टङ्कलेख-यंत्रम् (टाईपरायटर) यस्य अक्षर फलकस्य (की बोर्ड) आश्रयेण देवनागरी-लिपि लेखनं सुलभीकरोति तदेव समुपयोजितं मॅकिन्तोष-गणक-यंत्रस्य कृते। देवनागरी-लिपि-स्वरूपाणि विविधानि अस्मिन् एव अक्षर-फलके अरोपयितुं लेखनं च तत् तत् सुलभीकर्तुं शक्यम्।

विविधानां लिप्यन्तराणां मिश्रितं लेखनम् एकस्मिन् एव पत्रे एकस्याम् एव पङ्क्तौ विविधाकारैः विविध-रीतिभिः कर्तुं शक्यम् इत्यपि ज्ञातं तत्र। जगतीतले मानव्यस्य प्रथम-विचाराविष्कारत्वेन सुप्रसिद्धः प्रथम-मंत्रः ऋग्वेदस्य *'अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।'* (ऋग्वेद १-१-१) इति देवनागरी-माध्यमेन प्रतिनिध्येन च सपदपाठं ससायणभाष्यं सिद्धीकृतः तैः इति साक्षात्कृत्य चकिताः सर्वे लक्षाधिक-मुद्रा-व्ययेन पश्चिम-गोलार्ध-यात्रां सुफलीकृत्य भारतम् आगतैः 'शारदा'कारैः शारदोपासकानां कृते इयम् महत्त्वपूर्णा उपलब्धिः प्रकाशिता गते दिने शारदाङ्के।

विज्ञानाधारम् आधुनिकं जगत् मनोवेगेन तदधिकवेगेन वा विज्ञान-क्षेत्रे अग्रतः प्रधावति। परं तत्रापि वैज्ञानिक-तंत्रेण सिद्धीकृतेषु गणक-यंत्रेषु देवनागरी-लिपि-शब्द-साधनाम् परिचाययितुं तेन जगता किम् आदृतम् इति चेत् अध्यात्म-विद्या-मूला वेद-संहिता। तत्रापि सर्वाद्यः ऋग्वेदः। तस्य प्रथम-मण्डलस्य प्रथमाध्यायस्य प्रथम-सूक्तस्य प्रथम-मंत्रः *'अग्निमीळे'* इति।

दुरे प्रक्षेपणीयाः वेदग्रन्थाः श्रुति-स्मृति-पुराणादि-वाङ्मय-मूलाधार-भूताः इति कथयितुं नावश्यकं बुद्धि-चातुर्यम्। मौर्ख्यं सर्वत्र सुलभम्। मूढानां नन्दनवने रममाणाः ते बुद्धिवादिनः धर्म-शत्रवः गच्छन्तु गर्तं तेषामेव पाप-प्राबल्येन। परं धार्मिकं जगत् सावधानं निरीक्षणपरं भवतु 'सांप्रतिकं विज्ञानम् अपि अन्ततो गत्वा अध्यात्मम् एव कथं शरणी करोति' इति।

शारदा-दैनिक-साहसे श्रेयोभागिता

* पू.दिगम्बरदासमहारा-प्रेरणा-मार्गदर्शनम्
* श्रीविठ्ठलराव जोशी चॅरिटीज् ट्रस्ट
* श्री सीतारामबुवा वालावलकर चॅरिटेबल ट्रस्ट
* श्रीगुरु-सेवा-मण्डलम्, डेरवण
* श्रीनिशिकान्त माधव जोशी, संपादकः मुद्रकः सागर
* श्रीप्रह्लाद अनन्त जोशी (फोटो-कम्पोज-विभागः)
* सुधा अर्जुनवाडकर, प्रबन्ध-संपादिका
* राजा दीक्षित, वृत्त-वितरण-सेवा ता.चिपळूण

संपादक

कॉम्प्युटरवर ऋग्वेदसंहिता

अमेरिकेत कॉम्प्युटरच्या सहाय्याने रोमन लिपिमधील मुद्रणाच्या सोयी सर्वप्रसिद्ध सर्वज्ञात आहेत. परंतु अमेरिकन संशोधकानी परदेशी लिपितील मुद्रणाच्या सोयीसाठी सर्वप्रथम आर्य सनातन वैदिक धर्माची, संस्कृत भाषेची लिपी देवनागरी आणि त्याचबरोबर द्राविडांची लिपि तामिळ या दोन लिप्यांमध्ये की बोर्ड कॉंम्प्युटरवर बसविले व त्या मुद्रणाला गती दिली असे फिलाडेल्फियाच्या सहाव्या विश्व संस्कृत संमेलनात आम्ही प्रत्यक्ष पाहिले.

देवनागरी शब्द साधनेसाठी 'मॅकिन्तोष कॉम्प्युटर' या शीर्षकाचा शोध निबंध ॲपल कॉम्प्युटरचे श्री. मार्क कटर यानी विश्व संमेलनाच्या पहिल्याच दिवशी (१४.१०.१९८४) सादर केला.

गेले कित्येक महिने कॅलिफोर्निया विश्वविद्यालयाचे (बर्कली) श्री. जॉर्ज हार्ट आणि ॲपल कॉम्प्युटरचे संचालक श्री. मार्क कटर यानी भरपूर खपून दक्षिण आशिया खंडातील विविध लिप्यांची अक्षरे मॅकिन्तोष कॉम्प्युटरवर बसवून देवनागरी मुद्रकांची मोठी सोय केली आहे.

'आयबीएम' टंक लेखन यंत्राचा अक्षरफलक (की बोर्ड) वापरुनच मॅकिन्तोष कॉम्प्युटरवर देवनागरी बसविण्यात आली आहे. देवनागरी लिपिची विविध स्वरूपे याच अक्षरफलकावर बसवून त्याचे लेखन, मुद्रण सोपे होऊ शकणार आहे.

निरनिराळ्या विविध लिप्यांचे एकत्र मिश्रित लेखन करून एकाच पृष्ठावर एकाच ओळीत हव्या त्या आकारात, हव्या त्या पद्धतीने या कॉम्प्युटरमुळे शक्य होईल हेहि तिथेच समजले.

जिथे मानवाचा पहिलाच वैचारिक आविष्कार अक्षर स्वरूपात उपलब्ध होतो तो ऋग्वेद आणि त्यातील पहिलाच मंत्र 'अग्निमीळे पुरोहितम्' (ऋग्वेद १ १ १) पदपाठ सायणभाष्यासह देवनागरीत त्या कॉम्प्युटरवर पाहून एक लाख रुपये खर्चुन केलेली पृथ्वीच्या पश्चिम गोलार्धाची अमेरिकेची वारी सुफल झाली असे वाटले. या वारीचा हा महत्वाचा लाभ आम्ही कालच्या 'शारदा' दैनिकात प्रसिद्ध केला आहे.

विज्ञानाच्या पायावर उभे रहात असलेले आजचे जग मनापेक्षाहि अधिक वेगाने विज्ञानाच्या क्षेत्रात घोडदौड करीत आहे. परंतु वैज्ञानिक तंत्रानी सिद्ध केलेल्या कॉम्प्युटरवर देवनागरीच्या अक्षराना बसविताना त्यानी सर्वप्रथम वापरली ती अध्यात्म विद्येची गंगोत्री असणारी ऋग्वेद संहिता. त्यातहि पहिलाच मंत्र - *'अग्निमीळे पुरोहितम्।'*.

श्रुति-स्मृति पुराण इत्यादी धार्मिक वाङ्मयाचा मूलाधार असणारे वेद, त्यांच्या पोथ्या दूर (अडगळीत) फेकून द्या असे सांगायला बुद्धिचातुर्य लागत नाही. मूर्खपणा हा सर्वत्र स्वस्त झाला आहे. मूर्खांच्या नंदनवनात रमणारे हे बुद्धिवादी खुशाल त्यांच्याच (पाप) कर्मानि खड्यात जावोत. परंतु धार्मिक जनतेने मात्र आधुनिक विज्ञानसुद्धा शेवटी अध्यात्मापुढेच कसे झुकते आहे याकडे काळजीपूर्वक अवधान ठेवले पाहिजे.

दहरवने (डेरवण-महाराष्ट्र) धर्म-महोत्सवः।

त्रिवर्गापवर्ग-प्रदान-दक्ष-त्र्यम्बकेश्वरादि पञ्च ज्योतिर्लिङ्ग-परिभूषिते महति राष्ट्रिये महाराष्ट्र-प्रान्ते दहरवन-क्षेत्रे प्रचाल्यमानम् ऋक्-संहिता-स्वाहाकारम्, अतिरुद्र-महायागम्, अयुतचण्डी-महायागं, लक्ष-गणेश-हवनं, पवमान-हवनादि-यागसमावायं च विनिभाल्य अत्रत्याः नानादेशतः समागताः विद्वांसः भक्तगणाः च भगवद्-भक्ति-भरिताः आनन्दाश्रु-निर्भराः समवलोक्यन्ते। अस्य अभूतपूर्वस्य महोत्सवस्य मूल-कारण-भूतं धार्मिक-शिरोमणिम् आस्तिक-जनता-गौरव-भाजनं *श्रीदिगम्बरदासमहाराजं (विठ्ठलराय जोशीमहाभागम्)* ते प्रशंसन्ते।

वेद-त्रयं 'त्रयी'-शब्देन उच्यते। त्रयी-मध्ये यजुर्वेदः तन्मध्ये च रुद्राध्यायः तत्रापि *'नमः सोमाय च'* इति आनुवाकः तन्मध्ये पुनः *'नमः शिवाय'* इति पञ्चाक्षर-मंत्रः रत्नम् इव विलसति। मंत्रोऽयं परात्परस्य अखिलाण्ड-कोटि-ब्रह्माण्डनायकस्य अष्टमूर्तेः परमेश्वरस्य प्रतिपादकः। एतादृश-पञ्चाक्षर-मंत्र-परिभूषितस्य रुद्राध्यायस्य सर्वापेक्षया महिमागरीयान्। *'यत्ते रुद्र पुरोधनुः।'* इत्यादिना वेदे संचितं पापम् एव रुद्र-कोपः इति उक्त्वा तं च कोपं व्याघ्रत्वेन उत्प्रेक्ष्य *'नमस्कारैः एव एनं शमयति।'* इति नमस्कार-रूपस्य रुद्राध्यायस्य अस्मत्-पीडा-कर-क्रूर-पाप-निवारकत्वं स्पष्टम् उक्तम्। स च रुद्रः अनेक-मूर्तिमान् भवति, अतः एव अष्टमूर्तिः अपि भवति। पञ्च-भूतानि तस्य रूपाणि एव।

इदानीं मानवाः क्वचिद् विषानलेन, क्वचिद् अतिवृष्ट्या, शीतवातेन, विष-मिश्रित-अन्न-जल-पानादिना शश्वत् अपमृत्युं प्राप्नुवन्ति इति दृष्टम्। एतादृश-राष्ट्रव्यापि-महापदः निवृत्तिः अतिरुद्र-यागानुष्ठानेन भवति। अनन्तरूप-धारिणां रुद्राणाम् अन्नं वातः वर्षम् इति इषवः रुद्राध्याये प्रोक्ताः। तादृशेभ्यः इषुभ्यः 'परित्राणं कर्तव्यम्' इति अभय-प्रार्थना-पुरःसरं नमस्कारः वर्णितः। चमकाध्याये च इष्ट-कामस्य अभ्यर्थना अपि उक्ता। इति रुद्र-पठनं हवनं च सर्वेषां सकलेष्टार्थदम्।

सप्तशती-महिमा लोकोत्तरः। तत्रापि अयुतचण्डी-जपानुष्ठान-हवनं राष्ट्रस्य उपसर्गादि-सकल-दोष-निवारकम् इति तंत्रकारैः प्रतिपादितम्।

उपसर्गान् अशेषांस्तु महामारी-समुद्भवान्।
तथा त्रिविधम् उत्पातं माहात्म्यं शमयेन्मम।।

इति देवी-माहात्म्ये देवी स्वयमेव प्राह। राष्ट्रक्षोभः अतिवृष्टिः युद्धादिकम् अत्याहितंच यदा यदा भवेत् तदा तदा अस्य अनुष्ठानेन राष्ट्रशान्तिः भवति इति द्वादशाध्यायेन प्रमाणितम्।

पवमानस्य अपमृत्यू-निवारकत्वं

'दशोत्तराण्यृचांश्चैव पावमानीः शतानि षट्।
एतत् जुह्वन् जपेन्मंत्रं घोर-मृत्यु-भयं हरेत्।'

इति प्रतिपादितम्। एवं च पवमानस्य (६१०) ऋचां हवने घोरमृत्यु-निवारणं भवति इति तात्पर्यम्।

अपि च श्रीगणेशः निर्विघ्नदायकः सकल-वेद-शास्त्र-प्रतिपाद्यः श्रीविष्णुः, अष्टादश-पुराणेषु, भारते, रामायणे च प्रतिपाद्यः। एतेषां ग्रन्थानां पाठन-हवनादिना रामराज्यवत् सुशासनम् अस्मिन् राष्ट्रे श्रीमन्महाविष्णोः परमानुग्रहेण भविता। इति एतत् सर्वं यजमान-संकल्पानुसारम् आवहन् अयं कर्मानुष्ठान-महोत्सवः लोके-कल्याण-कारकः वरीवर्ति।

वेदस्य रक्षणेन एक ब्राह्मण्यं रक्षितं भवति। नाना-प्रान्तेभ्यः समागताः विद्वांसः अत्र श्रद्धया अग्निमुखे हवनीयं होष्यन्तः देवताः प्रीणयन्ति। यजमानस्य लोकस्य च कल्याणं कामयन्ते। कलिना कलुषिते काले अपि इमं विदुषां समवायं दृष्ट्वा भक्ताः सनातन-वैदिक-आर्य-धर्मस्य पुनर् उज्जीवने शङ्कां विजहति। विशेषतः अस्य महोत्सवस्य कारण-कर्तुः पू. *श्रीदिगम्बरदासमहाराजस्य* सहकार्यकर्तृणां च कार्य-कुशलतां प्रशसन्ति।

एतादृशां लोक-कल्याण-रतानां प्रयत्नः सर्वेषाम् अपि आदर्शावहः।

सकल-कल्याणानां निदानम् उमलिङ्गित-वामभागः सर्व-जगन्-मङ्गलदायी परमेश्वरः कटाक्षामृत-वर्षणेन जगदिदं मङ्गलमयं तनोत्। सर्वे जनाः सुखिनः भवन्तु।

विद्वान्, शारदा-पीठम् पं. एम. व्ही. नरसिंहमूर्तिशास्त्री
शृङ्गेरी : ५७७१३९

श्रीराम जय राम जय जय राम। श्रीराम राम जय राम जय जय राम। श्री राम जय राम। श्रीराम जय राम जय जय राम।

कस्मै देवाय हविषा विधेम।

यस्येमे हिमवन्तो महित्वा यस्य समुद्रँ रसया सहाहुः।
यस्येमा प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम।

यस्य षडैश्वर्य-संपन्नस्य भगवतः हिमालयादि महान्तः पर्वताः, गङ्गा-यमुना-कावेर्यादि- समुद्र-गामिन्यो महानद्यः वैभवं प्रकटीकुर्वन्ति, दश दिशः यस्य बाहुत्वेन विद्योतन्ते एतादृश-वैभव-संपन्नाय प्रजापतये वयं हविषा पूजायामः।

येन द्यौर् उग्रा पृथिवी च दृढा
येन स्वः स्तम्भितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः
कस्मै देवाय हविषा विधेम।।

येन भगवता वृष्ट्यादिद्वारा द्यौः उग्रा कृता, सर्वाधाराय नदी-वृक्ष-पर्वत पशु-मानवादीनाम् आधाराय पृथिवी दृढा सर्वाधार-क्षमा कृता स्वर्गो लोकः अन्तराले स्तम्भितः, आदित्य-रूपेण यः प्रकाशते तस्मै प्रजापतये वयं हविषा पूजायाम्।

मधली ओळ, नासिक पं. लक्ष्मीकांत दीक्षित

श्रीराम जय राम जय जय राम। श्रीराम राम जय राम जय जय राम। श्रीराम राम जय राम जय जय राम।

ईशचरणी मागे तया धन्यता।

पुजोनी जगदंब ईश गुरुजी अग्नीसही स्थापिती।
साद्गुण्या ग्रहदेवतांस सगळ्यां साह्यार्थ त्यां स्थापिती।
गो संख्या ग्रहदेवतां घृत-समित् देऊनी चर्वाहुती।
हेरंबास अथर्वशीर्ष जपुनी लक्ष प्रमाणाहुती।।

रुद्राला जप-होम-सूक्त जपुनी देई तिला आहुती।
तैसेची जप-होम सौर जपुनी सूर्या तिला आहुती।
मुख्यत्वे अतिरुद्र विप्र जपुनी ईशासही अर्पिला।
तैसा उत्तम पक्ष मंत्र जपुनी इशास देई तिला।।
तुष्टावी जगदंब विश्वजननी देवी चरित्रा जपे।
संख्या ती अयुता दशांश-हवना शांतीस दे त्वत कृपे।।
थोडे भागवता पुराण पठती रामायणा वाचिती।
त्यांचा तो लव मुख्य होम करिती देवासहि अर्पिती।।

ऐसा हा श्रुति-याग साध्य करण्या ज्याना प्रभु प्रेरितो।
त्यांच्या भाग्य यशास वर्णु किति मी देवो तशी बुद्धि तो।।
ते हे वि ठ्ठ ल रा व धन्य असुनी पावो जगीं मान्यता।
दुर्गाराम सहर्ष ईश-चरणी मागे तयां धन्यता।।

सावई-वेरें, फोंडा (गोवा) *दुर्गाराम-कृष्णभट खेडेकर*

श्रीराम जय राम जय जय राम। श्रीराम जय राम जय जय राम। श्रीराम राम जय राम जय जय राम। श्री राम जय राम।

शारदा : २६ : १० यज्ञीकृत क्रमाङ्कः PNCW १०७ पूर्वमूल्यं विना प्रेषा अनुज्ञा क्र. ७१ पुणे ३० पृथक्करणकार्यालये समर्पितम् १०.१.१९८५


नूतनं केंद्रीयं मंत्रि-मंडलम् ।



ना. शंकरराव



वसंतराव



गाडगीळ



के. सी. पंत



एच. के. एल. भगत



बुटासिंग



यु. पी. सिंग



नरसिंहराव



ए. के. सेन




बन्सिलाल



विरेंद्र पाटील



राव बिरेंद्रसिंग



बी. शंकरानंद



किडवाई

'शारदा-दैनिक-वितरण-केन्द्रम्
राजा दीक्षित वृत्तपत्रागारम्
चिपळूण (रत्नागिरी) ४१५६०५

ऐतिहासिके यागमहोत्सवे 'शारदा'-शुभचिन्तनम् ।
अन्नपूर्णा केटरर्स
(काजरेकर-बन्धु-पञ्चकम्)
नारायण पेठ, पुण्यपत्तनम्- ३०

संपादकः मुद्रकः प्रकाशकः स्वामी - पं. वसन्त अनन्त गाडगीळ, बी.ए.बी.एड्., साहित्य-विशारद (पुणे दूरवाणी - ५२१२४)
मुद्रण-स्थलम - शारदा-मुद्रण-सिद्धि-मन्दिरम, पुणे १६ मे. कोकण प्रिंटर्स, चिपळूण ४१५६०५ (दूरवाणी १०१)
प्रकाशन-स्थलम् - श्रीशिव-समर्थ-मन्दिरम्, डेरवण (चिपळूण - रत्नागिरी) शारदा, २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६